प्रश्नः – अधस्थितस्य श्लोकस्य प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्यानं कुरुत।

उत्तरम् –

ममैवांशो जीवलोके जीवभूतः सनातनः।

मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥ (गीता – १५.७)

श्लोकोऽयं वेदव्यासविरचितस्य महाभारतस्य भीष्मपर्वान्तर्गतायाः ब्रह्मविद्यारूपायाः श्रीमद्भगवद्गीतायाः सप्तमाध्यायात् ज्ञानविज्ञानयोगात् समुपलभ्यते।

अमुक्तः जीवात्मा देहपिञ्जरेण आबद्धः सन् अहं कर्ता अहं भोक्ता इति मन्यते। अनेन सः विषयभूते सुखसागरे एव निमग्नो भवति। तस्मात् तत्र परमधाम्नि गमनाय किमस्ति तस्य सामर्थ्यम् इति जिज्ञासा जायत चेत् तस्याः समाधानं प्रस्तौति साक्षात् भगवान् ममैवांशो जीवलोके.. इति।

जीवलोके संसारे इह जगति वा मम एव परमात्मनः सनातनः चिरन्तनः नित्यः जीवभूतः अंशः जीवात्मरूपः अंशः प्रकृतिस्थानि प्रकृतौ वर्तन्ते यानि तानि मनःषष्ठानि मनसा सह षट्संख्याकानि इन्द्रियाणि कर्षति उत्क्रमणकाले आकृष्य गच्छति इति सान्वयप्रतिपदार्थाः।

पूर्वस्मिन् श्लोक भगवता उक्तं "यद् गत्वा न निवर्तन्ते तद्धाम परमं मम" इति। तस्मात्तत्र प्रश्नः उदेति इह गमनात् परम् प्रत्यागमनं संयोगात् परम् विप्रयोगः तिष्ठति इति हि प्रसिद्धम्। कथं तर्हि उक्तं यत् तद्धामगतानां न निवृत्तिरिति। तत्र कारणम् उच्यते श्रीभगवता स्वयं, मम परमात्मनः एव अंशः भागः अवयवः एकदेशः जीवलोके संसारे जीवभूतः भोक्ता कर्ता इति प्रसिद्धः। स च जीवः सनातनःममांशत्वात्। तत्र दृष्टान्तो यथा, जले शुष्के सति जलसूर्य सूर्ये एव विलीनो भवति।न तु पृथक्तया विराजते। तथैव जीवात्मा परमात्मनि लीयते।

ननु परमात्मा खलु निरवयवः भवति। तस्यां शत्वं न कथमपि सम्भवति। ईश्वरस्य सावयवत्वे अनित्यत्वम् आपद्यते इति चेत् उच्यते नैषः दोष इति। एष जीवभावः अविद्याकृतः एव।

एषः जीवः परमात्मनः अंशभूतः शरीरम् अधिष्ठाय विषयम् उपसेवते। देहात् देहान्तरं च व्रजति। उत्क्रमणकाले स जीवात्मा चक्षुःकर्णनासिकाजिह्वात्वगिति पञ्चेन्द्रियाणि मनसा सह स्वस्थानेभ्यः आकर्षति। वायुरिव पुष्पेभ्यः गन्धमिव अयं जीवात्मा एतानि पूर्वोक्तानि इन्द्रियाणि संगृह्य देहान्तरं प्रविशति इति भागवतभणितिरिति शिवम्॥